वेदान्तसंज्ञा

५·२३

वेदां० १ ॥श्रीगणपतयेनमः॥ ॐहरिः श्रीमद्गुरोः पादयुग्मं नत्वा तत्प्रसादतः वेदांतसंज्ञाः
प्रत्येकं निरूप्यंते यथामति १ अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यत इति वृद्धव
चनम् तत्राध्यारोपो नाम अवस्तुन्यवस्त्वारोपः वस्तु सच्चिदानंदात्मकं ब्रह्म १ अवस्तु
ज्ञानादिसकलजडसमुदायस्वरूपमहाप्रपंचः प्रपंचद्वयं १ अज्ञानद्वयं २ तत्त्व
शरीरद्वयं ३ स्थूलशरीरद्वयं ४ शक्तिद्वयं ५ निःश्रेयसद्वयं ६ संशयद्वयं ७ असं
भावनाद्वयं ८ विपरीतभावनाद्वयं ९ महाद्वयं १० समाधिद्वयं ११ ब्रह्मत्रयं १२ जी
वत्रयं १३ शरीरत्रयं १४ अवस्थात्रयं १५ करणत्रयं १६ कर्मत्रयं १७ पुण्यकर्म
त्रयं १८ पापकर्मत्रयं १९ मिश्रकर्मत्रयं २० प्रारब्धत्रयं २१ प्रतिबंधत्रयं २२ सं
बंधत्रयं २३ तापत्रयं २४ अधिभूतादित्रयं २५ कारणत्रयं २६ गुणत्रयं २७ का १

वे॰शा॰ यपं॰७१ अमपं॰७२ निर्वर्त्तकदृष्टांतपं॰७३ दृष्टांतपं॰७४ ख्यातिपं॰७५ समाधिषट्कं
२ ७६ अरिषड्वर्गाः ७७ षड्भावविकाराः ७८ षट्कोशिकाः ७९ षडूर्मयः ८० षड्विधलिं
गानि ८१ षडवस्थाः ८२ षड्शास्त्राणि ८३ षट्सूत्राणि ८४ षडंगानि ८५ षट्कर्मा
णि ८६ षट्प्रमाणानि ८७ शमादिषट्कं ८८ सप्तावस्थाः ८९ सप्तचैतन्यानि ९०
२ धरादिसप्तकं ९१ अतलादिस॰ ९२ सप्तभूमिकाः ९३ पुर्यष्टकं ९४ प्रकृत्यष्टकं ९५
अष्टांगानि ९६ अष्टांगं ९७ नवविधसंसारः ९८ देवतापंचदशकं ९९ अस्थ्यादि व
पंचदश॰ १०० रागादिषोडशकं १०१ षोडशकंलिंगं १०२ सप्तदशकंलिंगं १०३ नवदशकं
लिंगं १०४ चतुर्विंशतितत्त्वानि १०५ षट्त्रिंशत्तत्त्वानि १०६ षडणवतितत्त्वानि १०७ संज्ञा
परमहंससंन्यासद्वयं १०८ विद्वत्संन्यासद्वयं १०९ निग्रहद्वयं ११० अहंकारद्वयं १११ २

लत्रयं २८ मूर्त्तित्रयं २९ ज्ञात्रादित्रयं ३० प्रपंचत्रयं ३१ लोकत्रयं ३२ ज्ञानप्रतिबं-
धकत्रयं ३३ वासनात्रयं ३४ श्रवणादित्रयं ३५ ज्ञानादित्रयं ३६ हेत्वादित्रयं ३७
प्राणायामत्रयं ३८ आध्यादित्रयं ३९ तादात्म्यत्रयं ४० एषणात्रयं ४१ सुषुप्त्यादि
त्रयं ४२ वर्त्तमानप्रतिबंधचतुष्टयं ४३ पुरुषार्थचतुष्टयं ४४ प्रारब्धप्रवृत्तिनिमि
त्तचं० ४५ वर्णचं० ४६ आश्रमचं० ४७ साधनचं० ४८ अनुबंधचं० ४९ अंतःक
रणचं० ५० संकल्पादिचं० ५१ वेदचं० ५२ प्रमाणचं० ५३ विघ्नचं० ५४ मैत्र्यादिचं०
५५ भूतग्रामचं० ५६ ब्रह्मविदादिचं० ५७ कोशपंचकं ५८ ज्ञानेंद्रियपं० ५९ तन्मा
त्रपं० ६० कर्मेंद्रियपं० ६१ वचनादिपं० ६२ प्राणादिपं० ६३ उपवायुपं० ६४ कर्मपं०
६५ सूक्ष्मभूतपं० ६६ स्थूलभूतपं० ६७ यमपं० ६८ नियमपं० ६९ भूमिकापं० ७० प्रल

वेदां॰ लात् भावत्वेन व्यपदेशरूपमज्ञानं मूलकारणत्वात्सत्वरजस्तमोगुणानां साम्यावस्था
३ रूपत्वाच्च मूलप्रकृतिः प्रलयावस्था अव्यक्तं अव्याकृतं महासुषुप्तिः कूटवन्नि
र्विकारेण तिष्ठतीति कूटस्थं ज्ञानं विनानश्वरत्वात्सदक्षरमिति व्यपदिश्यते स्थूलसूक्ष्मका
रणप्रपंचानां समष्टिः महाप्रपंचः बाह्यप्रपंच आंतरप्रपंच इति प्रपंचद्वयं । पृथिव्यादि
पंचभूततज्जन्यब्रह्मांडतदंतर्भूतोपर्युपरि विद्यमानभूर्भुवःस्वर्महर्जनस्तपःसत्यना
3 मकाधोऽधो विद्यमानातलवितलसुतलतलातलमहातलरसातलपातालनामकच
तुर्दशभुवनतदन्तस्थजरायुजांडजस्वेदजोद्भिज्जचतुर्विधभूतग्रामसमुदायः यथायो
ग्यं विविधनामरूपगुणधर्मशक्त्याश्रयः बाह्यप्रपंचः । अन्नमयादिपंचकोशशरीरादि संज्ञा
त्रयास्तीत्यादिषड्भावविकारत्वङ्मांसादिषट्कौशिकाशनापिपासादिषडूर्मिश्रोत्रादि ३

आनंदत्रयं ११२ कर्मत्रयं ११३ जाग्रत्त्र० ११४ स्वप्नत्र० ११५ सुषुप्तित्र० ११६ आत्मत्र०
११७ संन्यासचतुष्टयं ११८ भूमिकाच० ११९ मुक्तिच० १२० अजिह्वादिषट्कं १२१ मौना
दिसप्तकं १२२ नाडिकादशकं १२३ नाडीदेवताद० १२४ अष्टांतरंगाभेदाः १२५ ष
डूर्मिभेदाः १२६ अष्टमूर्तिभेदाः १२७ अष्टपाशाः १२८ सप्तधातवः १२९ सप्तव्य०
सनानि १३० षड्भ्रमाः १३१ पंचक्लेशाः १३२ आध्यात्मिकतापद्वयं १३३ स्वर्गलो०
कतापत्रयं १३४ पंचसप्ततिगुणाः १३५ रूपषट्कं १३६ स्पर्शचतुष्टयं १३७ शब्दद्वयं
१३८ रसषट्कं १३ गंधद्वयं १३९ नववर्णाः १४० ऐश्वर्यादिषट्कं १४१ उत्साहादिषट्कं
१४२ नादादित्रयं १४३ इत्येताः संज्ञाः १४४ शास्त्रेतेरुदाहृताः स्थिताः प्रत्येकं निरूप्यं
ते सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिअहमन्तः मोहितस्तमनुभवव

 ष्टिस्थूलसूक्ष्मशरीरलयस्थानमितिचोच्यते समष्टिसूक्ष्मशरीरं व्यष्टिसूक्ष्मशरीरमिति
४ सूक्ष्मशरीरद्वयं २ अखिलंसूक्ष्मशरीरमेकबुद्धिविषयत्वेनवनवज्जलाशयवद्वास
मष्टिः अनेकबुद्धिविषयतयावृक्षवज्जलवद्वाव्यष्टिश्चभवति अखिलसूक्ष्मशरीरं
हिरण्यगर्भोपाधिः विज्ञानमयादिकोशत्रयंजाग्रद्वासनामयत्वात्स्वप्नः अतएवसम
4 ष्टिस्थूलप्रपंचलयस्थानमितिचोच्यते अखिलसूक्ष्मशरीरंअनेकबुद्धिविषयत्वा
स्थूलप्रपंचापेक्षयासूक्ष्मत्वाच्चव्यष्टिसूक्ष्मशरीरंतैजसोपाधिः विज्ञानमयादिको
शत्रयं जाग्रद्वासनामयत्वात्स्वप्नः अतएवव्यष्टिस्थूलप्रपंचलयस्थानमितिचोच्य
ते समष्टिस्थूलशरीरंव्यष्टिस्थूलशरीरमितिस्थूलशरीरद्वयं ४ जरायुजांडजस्वेद 
जोद्भिज्जाख्यंचतुर्विधंसकलंस्थूलशरीरं नवज्जलाशयवद्वाएकबुद्धिविषयत्वात्स 

ज्ञानेंद्रियपंचकवागादिकर्मेंद्रियपंचकप्राणादिवायुपंचकमनआद्यंतःकरणचतुष्ट
यसंकल्पाद्यंतःकरणवृत्त्यवस्थात्रयतद्व्यापारतदभिमानिविश्वतैजसप्राज्ञसमाधि
मूर्च्छाकरणत्रयकामक्रोधाद्यरिषड्वर्गसाधनचतुष्टयसात्विकादिगुणत्रयसुख
दुःखज्ञानाज्ञानपंचक्लेशमैत्र्यादिचतुष्टययमाद्यष्टांगप्रत्यक्षादिप्रमाणचतुष्टय
रोगारोग्यादिसमुदायः तथायोग्यंविविधनामरूपगुणधर्मशक्त्याश्रयआंतरप्रपंच इति
विवेकः २ समष्ट्यज्ञानं व्यष्ट्यज्ञानमित्यज्ञानद्वयं २ अज्ञानस्यसमष्ट्यभिप्रायेणैकत्व
व्यपदेशः व्यष्ट्यभिप्रायेणनानात्वव्यपदेशः समष्ट्यज्ञानमीश्वरोपाधिः उत्कृष्टोपाधि
तयाविशुद्धसत्वप्रधानस्वरूपामाया अखिलकारणत्वात्कारणशरीरं आनंदप्रचुर
त्वात्कोशवदात्मनआच्छादकत्वाच्चानंदमयकोशः सर्वोपरमत्वात्सुषुप्तिः अतएवव्य

वेदां० संशयद्वयं ७ तथाहि श्रुतिभिः कर्मबोध्यतेउत सिद्धब्रह्मप्रतिपाद्यतेइत्येवंरूपा चि
५ त्तवृत्तिः प्रमाणगतसंशयः १ ब्रह्मजगत्कारणंउतप्रधानादिकमित्येवंरूपाचित्तवृ
त्तिः प्रमेयगतसंशयः २ प्रमाणगतासंभावनाप्रमेयगतासंभावनेत्यसंभावनाद्व
यं ८ ब्रह्मणः सिद्धत्वात्पृथिव्यादिवत्प्रमाणांतरगम्यत्वेनश्रुतिः सिद्धब्रह्मप्रतिपा
5 दिकाकथंभवेत् फलाभावान्नभवत्येवेति निश्चयात्मिकाचित्तवृत्तिः प्रमाणगतासं
भावना १ ब्रह्मणोजगद्विलक्षणत्वेनस्थितत्वात्जगत्कारणत्वंकथंसंभवतिनसं-
भवत्येवेति निश्चयात्मिकाचित्तवृत्तिः प्रमेयगतासंभावना २ प्रमाणगतविपरीत
भावनाप्रमेयगतविपरीतभावनेतिविपरीतभावनाद्वयं ९ ब्रह्मणः सिद्धत्वेन- २म
श्रुतीनांतत्प्रतिपादकत्वेनिष्फलत्वप्रसंगात्श्रुतयः कर्मपराएवेतिनिश्चयः प्रमा ५

क्ष्मशरीरापेक्षयास्थूलत्वात्समष्टिस्थूलशरीरं विराडुपाधिः अन्नविकारत्वात्कोश
वदात्मन आच्छादकत्वाच्चान्नमयकोशः स्थूलभोगायतनत्वाज्जाग्रदिति चोच्यते
एवोक्तं चतुर्विधस्थूलशरीरं सकलं वृक्षवज्जलवद्वानेकबुद्धिविषयतयासू
क्ष्मशरीरापेक्षयास्थूलतयाव्यष्टिस्थूलशरीरं विश्वोपाधिः अन्नविकारत्वादेतो
रेवात्मनः कोशवदाच्छादकत्वाच्चान्नमयः कोशः स्थूलभोगायतनत्वाज्जाग्रदिति
चोच्यते ४ आवरणशक्तिर्विक्षेपशक्तिरिति शक्तिद्वयं ५ अंतर्दृग्दृश्ययोर्भेदं व
हिश्च ब्रह्मसर्गयोर्भेदं वा स्वात्मावलोकयितृबुद्धिं अखंडसच्चिदानंदस्वरूपं वा आ
वृणोतीत्यावरणशक्तिः १ विविधस्वरूपेणभवनं विक्षेपशक्तिः २ अनर्थनिवृ
त्तिरानंदावाप्तिश्चेति निःश्रेयसद्वयं ६ प्रमाणगतसंशयः प्रमेयगतसंशयश्चेति

वेदां० इतिचोच्यते एतदेवब्रह्मसत्त्रयं ॥१२॥ ब्रह्मईश्वरः साक्षीपरमात्माकूटस्थः अक्षरंजगदधि
६ ष्ठानंजगन्निषेधावधिभूतंचअवशिष्यते बृहत्त्वात् बृंहणत्वाद्ब्रह्म बृहत्त्वंव्यापक
त्वं बृंहणत्वंशरीरवृद्ध्यादिहेतुत्वमिति विवेकः समष्टिस्थूलशरीरोपाधिकचैत
न्यंविविधंराजमानत्वाद्विराट् विश्वेषुसमस्तेषुनरेषुस्वाभिमानित्वाद्वैश्वानरः
6 विशेषेणभासमानत्वाद्वैराजइतिचव्यपदिश्यते समष्टिसूक्ष्मशरीरोपाधिकचै
तन्यंज्ञानशक्तिमत्वाद्धिरण्यगर्भः मणिसूत्रवत्समस्तप्रपंचानुस्यूतत्वात्सूत्रात्मा
क्रियाशक्तिमत्वात्प्राणइतिचव्यपदिश्यते समष्ट्यज्ञानोपाधिकचैतन्यंसमस्तप्रा
णिनियामकत्वादीश्वरः समस्तप्राणिहृदयनिविष्टत्वेसतिसमस्तप्राणिकर्मप्रेरक राम
त्वादंतर्यामी नामरूपरहितत्वादव्याकृतः सकलाज्ञानतत्कार्यावभासकत्वाज्ज ६

णगतविपरीतभावना १ ननुपदयोः कार्यकारणयोः सारूप्यं स्वपत्ते अतोजगद्ब्र
ह्मणोः सारूप्याभावाज्जगत्कारणं प्रधानादिकमेवेति निश्चयः प्रमेयगतविपरीतभा
वना २ एवमांतरे तथाहि जगदंतःपातिनि मयि जगद्विलक्षणब्रह्मत्वमस्ति वान
वेति प्रसंगात्मविषयकः संशयः १ कर्तृत्वाद्यनेकधर्मविशिष्टस्य ममाकर्तृब्रह्मस्व
रूपत्वं कथं भवेत् न भवत्येवेति निश्चयात्मिका चित्तवृत्तिः प्रसंगात्मविषयकासंभा
वना १ यद्यकर्ताहं तर्हि कथं मम शास्त्रेस्त्वयाकर्मकर्तव्यमिति कर्मोपदेशः अतः
कर्तैति निश्चयात्मिका चित्तवृत्तिः प्रसंगविषयिणी विपरीतभावना स्थितप्रज्ञास्थि
तप्रज्ञेति प्रज्ञाद्वयं १० संप्रज्ञातसमाधिरसंप्रज्ञातसमाधिश्चेति समाधिद्वयं ११ एकं १
मेवाद्वितीयं ब्रह्मसमष्टिस्थूलसूक्ष्मकारणशरीरोपाधिनयाविराड्हिरण्यगर्भईश्वर उ१

वेदां० वत्तिर्विकारेण तिष्ठतीति कूटस्थः इति विवेकः व्यष्टिस्थूलशरीरोपाधिक आ
७ त्मा स्थूलसूक्ष्मकारणशरीरादिसमस्ताभिमानित्वाद्विश्वः सूक्ष्मशरीरमपरि
त्यज्य स्थूलशरीरप्रवेष्टृत्वाद्वा विश्वः समस्तव्यवहारकर्तृत्वाद्व्यावहारि
कः चिदवभासमानत्वे सति विलक्षणरहितत्वाच्चिदाभास इति व्यपदि
श्यते व्यष्टिसूक्ष्मशरीरोपाधिक आत्मा तेजोमय्यान्तःकरणवृत्तिविशिष्ट
7 त्वात्तैजसि वासनायां अहं ममाभिमानित्वात्स्वप्नो भवतीति सुसत्वेश्च तैज
सः प्रतीतिकालमात्रविद्यमानत्वात्प्रातिभासिकः अज्ञानकार्यनिद्राशक्तिक
ल्पितत्वात्स्वप्नकल्पित इति व्यपदिश्यते व्यष्ट्यज्ञानोपाधिक आत्मा शरीरद्व राम
द्वयोपादानव्यष्ट्यज्ञानतत्कार्यावभासकत्वात्स्वल्पोपाधितया अनतिप्रकाश ७

ध

गत्वात्कारणं केनापिप्रमाणेननव्यज्यत इत्यव्यक्तमितिचव्यपदिश्यते एकएवप्रत्यगा
त्माव्यष्टिस्थूलसूक्ष्मकारणशरीरोपाधिकत्वेनविश्वस्तैजसःप्राज्ञइतिचव्यपदि
श्यते एतदेवजीवत्रयमितिव्यवहारः १३ प्रत्यगात्माशरीरत्रयाधिष्ठानंजीव सा
क्षीकूटस्थः नद्रष्टास्पदारः चित्चैतन्यंचितिरितितिपर्यायः प्रातिलोम्येनांचत्ती
त्तिप्रत्यक् तथाहि प्रातिलोम्येनान्तर्जडदुःखात्मकाहंकारादिभ्योविलक्षणत्वे
न सच्चिदानंदात्मकतया अंचतिप्रकाशतइतिप्रत्यक् तथाचाहंकारोनात्मादेहो
नात्माइंद्रियाणिनात्मा इत्येवंनिष्कृष्टाहंकारादिष्वेतन्यंप्रत्यगित्यर्थः शरीरत्र
योपादानमप्यज्ञानकल्पनाधिष्ठानत्वाच्छरीरत्रयाधिष्ठानं स्वाध्यस्तान्तपदा
र्थान्साक्षात्तद्वृत्तिमव्यवधानंविनाअपरोक्षरूपेणज्ञातेप्रकाशयतीतिसाक्षी कूट-

ःफलं पापमध्यमस्य आम्रपनसनारिकेलमहिषाश्वगर्दभादिशरीरप्राप्तिःफ
लं पापसामान्यस्य गोगजाश्वस्य तुल्यस्यादिशरीरप्राप्तिःफलं मिश्रोत्कर्षमिश्रमध्यममि
श्रसामान्यानीति मिश्रकर्मत्रयं २० मिश्रोत्कर्षस्य निष्कामकर्मानुष्ठानादिनिर्विक
ल्पकसमाधिपर्यंतयोग्यशरीरप्राप्तिःफलं मिश्रमध्यमस्य स्वाश्रमोचित काम्यकर्म
योग्यशरीरप्राप्तिःफलं मिश्रसामान्यस्य चंडालव्याधादिशरीरप्राप्तिःफलं मनोवाक्का
यभेदेन कामादिप्रेरितमनोवाक्कायकृतकर्मोत्कर्षादिभेदेन कर्मतत्फलं चानेकवि
धमिति ज्ञातव्यं इच्छाप्रारब्धं परेच्छाप्रारब्धम् अनिच्छाप्रारब्धमिति प्रारब्धत्रयं २१ भूत
प्रतिबंधो वर्त्तमानप्रतिबंध आगामिप्रतिबंधश्चेति ज्ञानप्रतिबंधकप्रतिबंधत्रयं २२ संज्ञाः
श्रवणमननादिकाले सर्वजडवस्तुसाक्षात्कारो भूतप्रतिबंधः १ पापकर्मजनितः ८

कत्वात्मज्ञारूपचैतन्यप्रधानपुरुषस्याच्चप्राज्ञः अवस्थात्रयानुस्यूततया वि
द्यमानत्वात् पारमार्थिकः अविद्याहंकारदेहाद्युपाधिपरिछिन्नत्वेन भासमा
नत्वादवच्छिन्न इति अथ यदि पृच्छते स्थूलसूक्ष्मकारणशरीराणि शरीरत्रयं १४ जा
ग्रत्स्वप्नसुषुप्त्यवस्था इत्यवस्थात्रयं १५ मनोवाक्कायानि त्रिविधं करणानि १६ क ४
पुण्यपापमिश्रकर्माणि कर्मत्रयं १७ पुण्योत्कर्षपुण्यमध्यमपुण्यसामान्यानीति
पुण्यकर्मत्रयं १८ पुण्योत्कर्षरूपकर्मणः हिरण्यगर्भशरीरप्राप्तिः फलं पुण्य
मध्यमरूपकर्मणः इंद्रादिशरीरप्राप्तिः फलं पुण्यसामान्यरूपकर्मणः यक्षरक्षा
दिशरीरप्राप्तिः फलं पापोत्कर्षपापमध्यमपापसामान्यानीति पापकर्मेकर्मत्र
यं १९ पापोत्कर्षस्य परतापकरगुल्मगुल्मचश्चिकयकचनमाक्षिकादिशरीरप्राप्ति

वेदां०

यं ३० एतदेवत्रिपुटीत्युच्यते त्रयाणांपुटानांप्रकाराणांज्ञात्रादीनांसमाहारस्त्रिपु
टीत्यर्थः स्थूलप्रपंचः सूक्ष्मप्रपंचः कारणप्रपंचश्चेतिप्रपंचत्रयं ३१ पातालमर्त्य
स्वर्गाः लोकत्रयं ३२ एतदेवजगत्त्रयमित्युच्यते संशयासंभावनाविपरीतभाव
नाः ज्ञानप्रतिबंधकत्रयं ३३ लोकवासनादेहवासनाशास्त्रवासनाचेतिवासनात्र
यं ३४ श्रवणमनननिदिध्यासनानिश्रवणादित्रयं ३५ सर्वसंशयनिवर्तकंश्र
वणं १ मननमसंभावनानिवर्तकं २ निदिध्यासनंतुविपरीतभावनानिवर्तकमिति
विवेकः ज्ञानंवैराग्यमुपरतिश्चेतिज्ञानादित्रयं ३६ हेतुस्वरूपकार्याणिहेत्वादि
त्रयं ३७ ज्ञानस्यहेतुः श्रवणादित्रयं अहंदेहेंद्रियाद्यतिरिक्तः साक्षीप्रतीयमा संज्ञाः
नप्रपंचोमिथ्यास्मरतिदृढनिश्चयोज्ञानस्यस्वरूपं अत्रनिश्चयस्यदार्ढ्यंनामसंभ्रा

कार्यान्वयः एकस्मिन्नुरूपेदृश्याविश्वासादिरूढासक्तिजनकोयः प्रारब्धशेषः स
आत्मानिप्रतिबंधः स तु जडभरतादिषु प्रसिद्धः संयोगसमवायः आध्यात्मिकता
दात्म्यसंबंध इति संबंधत्रयं २१ अथवा कार्यकारणभावः विषयविषयिभावः
आधाराधेयभावश्चेति संबंधत्रयं २२ अथवा पदयोः सामानाधिकरण्यं पदार्थयोर्वि
शेषणविशेष्यभावः प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभावश्चेति संबंधत्रयं २३
लक्षणं तत्त्वमस्यादिवाक्यमित्यर्थः आध्यात्मिकं आधिभौतिकं आधिदैविकं चेतिता
पत्रयं २४ अध्यात्ममधिभूतमधिदैवतमित्यध्यात्मादित्रयं २५ आरंभपरिणामवि
वर्त्ताः कारणत्रयं २६ सत्त्वरजस्तमांसीति गुणत्रयं २७ भूतभविष्यद्वर्तमानकालाः
कालत्रयत्रं २८ ब्रह्मविष्णुमहेश्वराः मूर्तित्रयं २९ ज्ञानाज्ञानं ज्ञेयमिति ज्ञात्रादित्र

वेदां० षणात्रयं ४१ एषणा अभिमानः सुषुप्तिमूर्छासमाधयः सुषुप्त्यादित्रयं ४२ विषयासक्तिः
१९ १ प्रज्ञामांद्यं २ कुतर्कः ३ विपर्ययदुराग्रहः ४ श्वेति ज्ञाने वर्त्तमानप्रतिबंधकचतुष्टयं ४
३ विषये दृढासक्तिर्विषयासक्ति १ बोधितस्यार्थस्याबुद्धावग्रहणं प्रज्ञामांद्यं २ प्रति-
पादितस्यार्थस्य विपरीतग्रहणं कुतर्कः ३ अहं श्रोत्रियः पंडितोहं विरक्तोहमिति देहें-
द्रियादावात्मत्वबुद्धिर्विपर्ययदुराग्रहः ४ शमादिषट्केन विषयासक्तेर्निवृत्तिः श्रवणे-
न प्रज्ञामांद्यस्य मननेन कुतर्कस्य निदिध्यासनेन विपर्ययदुराग्रहस्येति विवेकः धर्मा-
र्थकाममोक्षाः पुरुषार्थचतुष्टयं ४४ जातिगुणक्रियासंबंधाः शब्दप्रवृत्तिनिमित्तचतु-
ष्टयं ४५ शब्दप्रवृत्तिनिमित्तानां तेषां ब्रह्मण्यसत्वेन तस्मिन्नशब्दाप्रवृत्तिरिति विभाव- संज्ञाः
नीयं ब्राह्मणक्षत्रियवैश्यशूद्रा इति वर्णचतुष्टयं ४६ ब्रह्मचर्याश्रमः गृहस्थाश्रमः वानप्र- १९

यादिशाहित्यं अनात्मस्वात्मत्ववुद्ध्यभावो ज्ञानस्य कार्यमिति विवेकः वैराग्यस्य हेतुर्वि
षयेषुदोषदृष्टिः वांताशनवद्धेयतावुद्धिःस्वरूपं पुनराशाभावः कार्यमिति विभाव^
नीयं उपरतेर्हेतुर्यमनियमादिः चित्तनिरोधःस्वरूपंसर्वव्यवहारनाशःकार्यमिति
हेतुस्वरूपकार्याणि ज्ञानवैराग्योपरतीनां विज्ञेयानि वैराग्यस्यावधिर्ब्रह्मलोकतृणी
कारः अज्ञानकाले देहादावात्मत्वविषयिणी दृढवुद्धिर्यथा तथा तदभ्रांतीति पूर्वकम
हं ब्रह्मेति दृढनिश्चयः वोधस्यावधिः सुषुप्तिवत्समस्तवस्तुविस्मृतिरूपरतेरवधिरिति
विज्ञेयं प्राणनिग्रहार्थं यथा रेचकपूरककुंभकाः प्राणायामत्रयं ३८ नेत्रधर्मांध्यमांद्य
पटुत्वान्यांध्यादित्रयं ३९ सहजतादात्म्यं कर्मजतादात्म्यं भ्रांतिजन्यतादात्म्यमिति अहं
कारस्य चिद्छायादेहसाक्षीभिस्तादात्म्यत्रयं ४० पुत्रैषणावित्तैषणालोकैषणाचेसे

श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि ज्ञानेन्द्रियपंचकं ५९ शब्दस्पर्शरूपरसगंधाः शब्दादिपंचकं ६० धनंजय

वेदां. शब्दाः प्रमाणचतुष्टयं ५३ लयविक्षेपकषायरसास्वादाः समाधिविघ्नचतुष्टयं ५४ मै-
११ त्रीकरुणामुदितोपेक्षा मैत्र्यादिचतुष्टयं ५५ जरायुजांडजस्वेदजोद्भिज्जानि भूतग्राम-
चतुष्टयं ५६ ब्रह्मविद्वरवरीयोवरिष्ठा इति ब्रह्मविदादिचतुष्टयं ५७ अन्नमयप्राण-
मयमनोमयविज्ञानमयानंदमयाः पंचकोशाः ५८ वाक्पाणिपादपायूपस्थाः कर्मे-
न्द्रियपंचकं ६१ वचनादानगमनविसर्गानंदाः वचनादिपंचकं ६२ नित्यनैमित्तिकप्रा-
21 यश्चित्तकाम्यनिषिद्धानि कर्मपंचकं ६५ नित्यानि प्रत्यवायसाधनानि संध्या-
वंदनादीनि १ नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि २ प्रायश्चित्तानि
पापक्षयसाधनानि कृच्छ्रचांद्रायणादीनि ३ काम्यानि स्वर्गादीष्टसाधनानि ज्योति- संज्ञा
ष्टोमादीनि ४ निषिद्धानि नरकाद्यनिष्टसाधनानि ब्रह्महत्यादीनीति विवेकः ६४ ११
।३। प्राणापानव्यानोदानसमानाः पंचप्राणाः ६३ नागकूर्मकृकरदेवदत्तधनंजयाः पंचोपवायवः ५

स्याश्रमः यस्याश्रमध्येसाश्रमचतुष्टयं ४७ नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभो
गविरागः शमादिषट्कसंपत्तिः मुमुक्षुत्वंचेतिसाधनचतुष्टयं ४८ विषयप्रयोजनसंबं
धाधिकारिणः अनुबंधचतुष्टयं ४९ मनोबुद्ध्यहंकारचित्तान्यंतःकरणचतुष्टयं
५० संकल्पाध्यवसायाभिमानानुसंधानानिसंकल्पादिचतुष्टयं ५१ संकल्पवृत्तिरूपेण
परिणतमंतःकरणंमनः मननात्मकंवामनः संकल्पवृत्तिहेतुर्वामनः १ निश्चयात्मवृ
त्तिरूपेणपरिणतमंतःकरणंबुद्धिः निश्चयात्मिकावाबुद्धिः निश्चयहेतुर्वाबुद्धिः २
अभिमानवृत्तिरूपेणपरिणतांतःकरणमहंकारः अभिमानात्मकोवाअभिमान
करोवा ३ पूर्वोत्तरानुसंधानरूपवृत्तिमदंतःकरणंचित्तं अनुसंधानात्मकंवा अनु
संधानकरंवा ४ ऋग्यजुःसामाथर्वणावेदाः वेदचतुष्टयं ५२ प्रत्यक्षानुमानोपमान

वेदां० धरूपासंप्रज्ञातसमाधिः निरुद्धभूमिका ५ नित्यप्रलयः १ आवांतरप्रलयः २ दैनं
१२ दिनप्रलयः ३ ब्रह्मप्रलयः ४ आत्यंतिकप्रलयश्चेति पंचप्रलयाः ॥ प्राणिनां सु
षुप्तिः नित्यप्रलयः १ चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यत इति ब्रह्मण एकस्मि
न्नहनि चतुर्दश मनूनां चतुर्दशेंद्राणां चाधिपत्येऽरकस्यापगते अन्यस्य प्राप्ते सति
12 आधिपत्यानुकूलपर्यंतं तस्मिन्समये चतुर्दशावांतरप्रलयास्तु च्यंते तेषां नैमि
त्तिकप्रलय इति संज्ञा मन्वंतरप्रलय इति च १ एते युगप्रलया नामांतर्भावः २ ब्र
ह्मणः सुषुप्तिः दैनं दिनं प्रलयः ३ ब्रह्मणो नाशावस्थाप्रलयः ४ तदानीमाका
शादि प्रपंचरहितं सद्ज्ञानमात्रं वर्त्तते ब्रह्मप्रलयस्य महाप्रलय इति संज्ञा प्राकृ राम
तप्रलयः सुषुप्तिरिति च ४ मुक्त्यवस्था आत्यंतिकप्रलयः ५ तत्समये अज्ञानस्य १२

ब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रगंधतन्मात्राणि सूक्ष्मभूतानि पंच ६६
पंचीकृतानि पृथिव्यप्तेजोवाय्वाकाशानि पंच स्थूलभूतानि ६७ अहिंसासत्यास्ते
यब्रह्मचर्यापरिग्रहाः पंच यमाः ६८ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि पंच
नियमाः ६९ क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति पंच भूमयः ७० आसुरसंपन्नो
कशास्त्रदेहवासनानुवर्तमानं चित्तं क्षिप्तभूमिका १ निद्रातंद्राद्यग्रस्तं चित्तं मूढभू
मिका २ कदाचिद्ध्यानयुक्तं चित्तं क्षिप्तमूढाभ्यां विशिष्टतया विक्षिप्तभूमिका ३ तत्र क्षि
प्तमूढयोः समाधिशंकैव नास्ति विक्षिप्ते तु समाधिस्थशंका नहितरत्भूमिद्वयंस
माधिः एकाग्रमनसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्मबंधनानि श्ल
थयति निरोधमभिमुखीकरोतीति संप्रज्ञातोयोगः एकाग्रभूमिका ४ सर्ववृत्तिनिरो

वेदां॰ ख्यातिरख्यातिरन्यथाख्यातिरनिर्वचनीयख्यातिश्चेति पंचख्यातयः ७५ एकरसव
१३ स्तुमात्रत्वेन चित्तस्य तदाकारवृत्तिविशेषावस्थानं संप्रज्ञातसमाधिः स च सविक
ल्पक इति चोच्यते स च पुनः दृश्यानुविद्धः शब्दानुविद्धश्चेति द्विधः दृश्यमिश्रो दृश्या वि
नुविद्धः १ शब्दमिश्रः शब्दानुविद्ध इति विवेकः वृत्तिमपि अखंडैकरसमात्रत्वे
नोपसंहरद्वृत्तिमत्तश्चित्तस्य प्रयत्नपूर्वकं वस्तुमात्रत्वेनावस्थानं असंप्रज्ञातः॥
23 समाधिः स एव निर्विकल्पक इति च गीयते दृश्यानुविद्धशब्दानुविद्धनिर्विकल्पकः
समाधय एव बाह्याभ्यंतरभेदेन षट्समाधय इति व्यवह्रियंते ७६ कामक्रोधलोभमो
हमदमात्सर्याणि अरिषड्वर्गः ७७ अस्ति जायते वर्धते परिणमते अपक्षीयते न संज्ञा॰
श्यतीति षड्भावविकाराः ७८ त्वङ्मांसरुधिरमेदोमज्जास्थीनि षट्कौशिकाः १३

सर्वात्मनाऽभावः इतिपंचप्रलयाः ७२ जीवात्मापरमेश्वराद्भिन्नः १ आत्मनिप्रतीयमा
नंकर्तृत्वादिवास्तवं २ शरीरत्र्यावच्छिन्नात्मासंगी ३ जगत्कारणत्वेनब्रह्मणोविका
रित्वं ४ कारणाद्भिन्नस्यप्रपंचस्यसत्यत्वमितिपंचभ्रमाः ५ विंबप्रतिविंबदृष्टांतेनभे
दभ्रमोनिवर्त्तनीयः १ स्फटिकलोहितदृष्टांतेनपारमार्थिककर्तृत्वभ्रमोनिवर्त्तनीयः
२ घटाकाशदृष्टांतेनसंगीतिभ्रमोनिवर्त्तनीयः रज्जुसर्पदृष्टांतेनजगत्कारणेब्रह्म-
णिविकारित्वभ्रमोनिवर्त्तनीयः ४ स्वर्णकटकलोहखड्गादिदृष्टांतेनकारणाद्भिन्न
त्वेनप्रतीयमानप्रपंचस्यसत्यत्वभ्रमोनिवर्त्तनीयः ५ इतिपंचभ्रमनिवर्त्तकदृष्टांत
पंचकं ७३ ब्रह्मणिजगत्भ्रांत्याप्रतीयतइत्यत्रशुक्तौरजतं रज्जौसर्पः स्थाणौपु-
रुषः गगनेनीलतादिमरीचिकायांजलमितिदृष्टांतपंचकं ७४ आत्मख्यातिरस-

वेदां० यादेरमिथ्याप्रतीतिः प्रारब्धस्यानिःशेषनाशो मोक्षो न तु प्रतीतिपूर्वकं अद्वितीया
१४ त्मस्वरूपेणावस्थानस्याचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमो
क्ष्येऽथ संपत्स्य इत्यादिश्रुत्या प्रतिपादनं फलं ४ प्रकरणप्रतिपाद्यस्य तत्तमादेश
मप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यादिश्रुत्या प्र
शंसनमर्थवादः स्वार्थे तस्य सर्वथाभावात् ५ यथा मृज्जन्यघटशरावादीनां मृद
14 भिन्नत्वं स्वर्णजन्यकटककमुकुटादीनां स्वर्णाभिन्नत्वं तथा कारणजन्यज
गतः कारणाभिन्नत्वमिति वाचारंभणमित्यादिश्रुत्या प्रतिपादितायुक्ति
रुपपत्तिः ६ शिशुत्वबाल्ययौवनकौमारतारुण्यवार्द्धक्यानि षडवस्था संज्ञाः
८२ पूर्वमीमांसोत्तरमीमांसे रम्ययोगाः षट्शास्त्राणि ८२ आलायनाप १४

शाक्तकर्मा स्व

७९ जरामरणक्षुत्पिपासाशोकमोहाः षडूर्मयः ८० उपक्रमोपसंहारावभ्यासोपूर्व-
ताफलं अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये इति षड्विधलिंगानि ८१ उपक्र
मोपसंहारावेकं लिंगं अद्वितीयात्मप्रतिपादकत्वात् सृष्टेः पूर्वं नामरूपरहितं
सत्तामात्रमिदं जगदिति छांदोग्यषष्ठप्रपाठकप्रकरणे सदेव सोम्येदमग्र आसी
दिति अस्याः प्रतिपादनमुपक्रमः प्रतीयमानं सर्वमिदं जगत् पूर्वोक्तसत्त्वरूप-
मेव नान्यदिति ऐतदात्म्यमिदं सर्वमिति अंते प्रतिपादनमुपसंहारः १
प्रकरणप्रतिपाद्यस्य तन्मध्ये तत्त्वमसीति नवसंख्याकोपदेशेन प्रतिपादनम
भ्यासः २ प्रमाणानां मध्ये त्तत्त्वमात्रं त्वौपनिषदं पुरुषं पृच्छामीत्युपनिषन्मात्र
माणेन गम्य आत्मा नेतरेणेति विवेकः अपूर्वता ३ प्रारब्धक्षयपर्यंतं देहेंद्रि

वेदां॰ तन्यमेवच प्रमाताचप्रमाणंचप्रमेयंचफलंतथा इतिसप्तविधंप्रोक्तंभिद्यते
१५ व्यवहारतः इतिसप्तविधचैतन्यं ॥९०॥ मायोपाधिविनिर्मुक्तंशुद्धमितिसमभिधीयते
मायासंबंधतश्चेशोजीवोऽविद्यावशस्तथा अंतःकरणसंबंधात्प्रमातेत्यभिधी
३ यते तथातद्वृत्तिसंबंधात्प्रमाणमितिकथ्यते अज्ञातमपिचैतन्यंप्रमेयमिति
कथ्यते तथाज्ञातंचचैतन्यंफलमितिसमभिधीयते भूर्भुवःस्वर्महर्जनस्तपः सत्य
25 मितिभूरादिसप्तकं ॥९१॥ अतलंवितलंसुतलंतलातलंमहातलंरसातलंपाता
लाख्यंतलादिसप्तकं ॥९२॥ ज्ञानभूमिः शुभेच्छाख्याप्रथमासमुदाहृता १ वि
चारणाद्वितीयास्यात्तृतीयातनुमानसा सत्त्वापत्तिश्चतुर्थीस्यात्ततोऽसंसक्ति सं.ता.
नामिका पदार्थाभावनीषष्ठीसप्तमीतुर्यगास्मृतेतिसप्तभूमिकाः ॥९२॥ भूमि १५

लं बोधायनकात्यायनसत्याषाढीवैखानसाः षट्सूत्राणि ८४ शिक्षाकल्पव्याक
रणनिरुक्तज्योतिषछंदांसि षडंगानि ८५ स्नानसंध्याजपहोमदेवतार्चनाति
थ्यवैश्वदेवाः षट्कर्माणि ८६ पूर्वोक्तप्रमाणचतुष्टयमनुपलब्धिरन्यथानु
पपत्तिरितिषट्प्रमाणानि ८७ शमोदमउपरतितितिक्षासमाधानश्रद्धेति
शा शमादिषट्कं ८८ अज्ञानमावरणंविक्षेपः परोक्षमपरोक्षमनर्थनिवृत्तिरा १५
नंदावाप्तिश्चेतिसप्तावस्थाः ८९ आवरणंद्विविधं नभातिकूटस्थइत्यभानावरणं
१ अतोभानात्नास्तिकूटस्थइत्यसत्त्वावरणमिति २ परोक्षज्ञानादसत्त्वावरण
निवृत्तिः अपरोक्षज्ञानादभानावरणनिवृत्तिः ततोविक्षेपनिवृत्तिः अतो
ऽनर्थनिवृत्तिरानंदावाप्तिश्चभवतीतिभावनीयं कुटमीश्वरश्चैतन्यंजीवचै

वे.सं.० भिन्नाग्रः कर्मचत्रिविधं तमः तत्वाज्ञानं एतेषांपुर्यष्टकमितिसंज्ञेतिभावः ८४ भूमिरा
१९ पोनलोवायुः खंमनोबुद्धिरेवच अहंकार इतीयंमेभिन्नाप्रकृतिरष्टधेतिप्रकृत्य
ष्टकं ८५ यमनियमासनप्राणायामप्रत्याहारणध्यानसमाधयः अष्टांगानिनिर्वि धार
कल्पकसमाधेरितिकेचित् ८६ अस्मिन्मते अष्टांगघटकसमाधिशब्देनसविक
ल्पकाख्यसंप्रज्ञातसमाधिरुच्यते संप्रज्ञातसमाधेरेतान्यष्टांगानीतिकेचित् अस्मि
न्मते अंगघटकसमाधिः संप्रज्ञाताद्भिन्नः संगीकर्तव्यं अंगांगिनोर्भेदस्यावश्य
26 कत्वात् तथाचविछिद्यविछिद्यप्रत्ययावृत्तिः ध्यानं सावधानेन अविछिद्यावि
छिद्यप्रत्ययावृत्तिरंगघटितसंप्रज्ञाताख्यसाधनसमाधिः निरवधानेनाविछिद्या सेता:
विछिद्यप्रत्ययावृत्तिः अंगिस्वरूपसंप्रज्ञाताख्यसाध्यसमाधिरितिभेदः अयाण १९

कानामचित्तस्यत्रावस्था विशेषः अत्र भूमिकात्रयं ब्रह्मविद्यासाधनमेव न तु
ब्रह्मविद्याकोटावंतर्भावः भेदस्य सत्यत्वबुद्धेरनिवृत्तत्वात् यश्च तुर्यभूमिकां प्राप्तः
स ब्रह्मविदित्युच्यते १ पंचमभूमौ निर्विकल्पात्तदा तदा स्वमेव व्युत्तिष्ठति सोयं यो
गी ब्रह्मविद्वरः षष्ठभूमौ पार्श्वस्थबोधितो व्युत्तिष्ठति सोयं ब्रह्मविद्वरीयान् २
तदेतद्भूमिद्वयं सुषुप्तिरिति चाभिधीयते असंप्रज्ञातप्रतिपादकानि योगशास्त्राणि
सप्तमभूमिकाप्राप्तयोगि स्वपरं न संवेत्ति सोयमीदृशो योगी व्युत्थानरहितः निर्वि
कल्पकसमाधिस्थः परमहंसः सप्तमभूमौ ब्रह्मविद्वरिष्ठ इति चोच्यते ४ ज्ञानेंद्रि
याणि खलु पंच तथापराणि कर्मेंद्रियाणि मनआदि चतुष्टयं च प्राणादिपंचकम
पोविद्यादि पंच कामश्च कर्म च तमः पुनरष्टधा पुरि त्रिपुर्यष्टकं ९७ कामोऽ

वेदां० रागपूर्वकं स्त्रियादिविषयकानुभवविशेषः क्रियानिवृत्तिः ८ ज्ञानं ज्ञाता ज्ञेयं १
१२ भोक्ता भोग्यं भोगः २ कर्त्ता करणं क्रियेत्येकः पतनं नवविधसंसारः ९८ पक्षांतरं च व
र्तते तथाहि पंचमहाभूतानि ज्ञानेंद्रियाणि कर्मेंद्रियाणि च प्राणादिपंचकं मनश्चा
दिचतुष्टयं स्थूलशरीरमेकं त्रिविधकर्माणि अवस्थात्रयं एतेषां कारणीभूतमज्ञा
नं चेति नवविधसंसारः ९९ दिग्वातार्कप्रचेतोश्विवन्हींद्रोपेंद्रमृत्युकाः तथा चं
17 द्रश्चतुर्वक्त्रो रुद्रः क्षेत्रज्ञ ईश्वर इत्यधिष्ठानदेवतापंचदशकं ९९ अस्थिचर्म
स्नायुमज्जामांसशुक्रशोणितश्लेष्माश्रुत्वचिकाविण्मूत्रकफवातपित्तान्यस्रादि
पंचदशकं १०० एतत्पंचदशसमुदायात्मकं स्थूलशरीरमिति ज्ञातव्यं रागद्वेषका सेतुः
मक्रोधलोभमोहमदमात्सर्येर्ष्यासूयादंभदर्पाहंकारेच्छाभक्तिश्रद्धा इति रागादिषो १२

विषयैकोपि चिन्त्यपरिपाकत्वात्तन्मैनांगीकरणीयः करचरणादिसंस्थाविशेष
लक्षणानि पद्मकस्वस्तिकादीनि आसनानि इंद्रियाणां स्वस्वविषयेभ्यः प्रत्याह
रणं प्रत्याहारः अद्वितीयवस्तुनि अंतरिंद्रियधारणं धारणा दर्शनं स्पर्शनं केलि
ः कीर्त्तनं गुह्यभाषणं संकल्पोध्यवसायश्च क्रियानिर्वृत्तिरेव च एतन्मैथुनमष्टां
गं प्रवदंति मनीषिणः विपरीतं ब्रह्मचर्यमनुष्ठेयं मुमुक्षुभिरिति अष्टांगं ८७ रा
गपूर्वकं स्त्रियादिविषयकज्ञानं दर्शनं १ तत्पूर्वकं क्रियाविशेषजन्यं ज्ञानं स्पर्श
नं २ रागपूर्वकं परिहासादिव्यवहारः केलिः ३ स्त्रियादेरनुरागपूर्वकं सौंदर्यादि
वर्णनं कीर्त्तनं ४ रागपूर्वकं रहसि संभाषणं गुह्यभाषणं ५ स्त्रियादिविषयको
हटेच्छाविशेषः इदमस्त्विति संकल्पः ६ अनया रमे इति निश्चयः अध्यवसायः ७

वे॰सं॰ यं ३ गुणत्रयं ३ कर्मत्रयं ३ वचनादिपंचकं ५ संकल्पादिचतुष्टयं ६ मैत्र्यादिच-
१८ तुष्टयं ७ दिग्वातार्काद्यधिष्ठानदेवताः १४ अन्तानाधिष्ठानदेवताव्यतिरिक्ताश्चतु-
र्दशपूर्वोक्तैस्तत्वैः सहषण्णवतिरिति केचित् ९६।७ विविदिषासंन्यासो विद्वत्संन्या-
सश्चेति परमहंससंन्यासद्वयं ८ जातरूपधरः कमंडलुधारीति विद्वत्संन्यासद्वयं
९ क्रमनिग्रहोहठनिग्रहश्चेति निग्रहद्वयं १० आगामिसंचितप्रारब्धानि कर्म-
18 त्रयं १२ प्रारब्धकर्मफलभोक्तासन्मरणपर्यंतंकृतंपुण्यपापरूपंकर्मआगामी-
त्युच्यते १ जन्महेतुभूतंस्थितंपूर्वजन्मकृतंकर्मसंचितमित्युच्यते २ शरीरारंभ-
कंकर्मप्रारब्धमितिभेदः ३ जाग्रज्जाग्रत् १ जाग्रत्स्वप्नः २ जाग्रत्सुषुप्तिरितिजा- संज्ञाः
ग्रत्त्रयं १४ स्वप्नजाग्रत् स्वप्नस्वप्नः २ स्वप्नसुषुप्तिरितिस्वप्नत्रयं १५ सुषुप्तिजा- १८

ड्शकं १२ एतेषां मध्ये भक्तिश्च द्वे मुक्तिहेतू इच्छानुमुक्तिहेतुश्च भवति अन्ये बंधहेत
वइति विवेकः कर्मेंद्रियपंचकं ५ ज्ञानेंद्रियपंचकं ५ प्राणादिपंचकं ५ अंतःक
रणं चेति षोडशकं लिंगमित्येके इदमेव सूक्ष्मशरीरमिति वदंति त्वं पंचप्राणमनो
बुद्धिदशेंद्रियसमन्वितं अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनमिति सप्तदशाऽ
वयवकं लिंगमित्येकः पक्षः ३ चित्ताहंकाराभ्यां सहितं पूर्वोक्तं नवदशकं लिंगमिति
पक्षांतरं ६ ज्ञानेंद्रियपंचकं ५ कर्मेंद्रियपंचकं ५ प्राणादिपंचकं ५ शब्दादिपंचकं
५ मनादिचतुष्टयमित्येवं चतुर्विंशतितत्वानीति केचित् ५ पंचीकृतभूतानि पं
च ५ शरीरत्रयं ३ अवस्थात्रयं अज्ञानं च पूर्वोक्तैस्तत्वैः षट्त्रिंशत्तत्वानीति के
चित् ६ षड्भावविकाराः ६ षडूर्मयः ६ षट्कोशिकाः ६ अरिषड्वर्गाः ६ जगत्त्र

इ२मिरामइ... थो॰स्मन्नपितुसज्जतेहितंमत्वंमितंवक्तितमजिह्वंप्रचक्षते १ मित्रादौसमचितंयस्य विरामूत॰ ॥५
तिष्ठतोव्रजतोवापियस्यचक्षुर्नदूरगं चतुर्युगांभवंमुक्त्वापरिवाडुच्यतेबुधैः १ हिताहितंमनोरामंवचःशोकावहं
सानिवोविषयाणांचसमयोविकृतविकल्लेन्द्रियःमुक्तवद्गतेतेनित्यंसमिन्द्रमुग्धउच्यतेति ॥१॥

वेरा॰ अध्यात्मविद्याधिगमः साधुसंगमएवच वासनासंपरित्यागः प्राणः स्पंदनिरोध
१९ नमितियुक्तिचतुष्टयं १२० चित्तत्रयेएकैवयुक्तिः साधनमिसतः पूर्वस्मिन् द्वा
ट्योभावेउत्तरस्मिन्साधनेप्रवृत्तिरितिविज्ञेयं अजि॰ः षंडकः पंगुरंधोवधि
रएवच मुग्धश्चमुच्यतेभिक्षुः षड्भिरेतैर्नसंशयः इत्यादिषट्क २१ अद्यजा
तांयथानारीतथाषोडशवार्षिकी मतवर्षांचयोदृष्ट्वानिर्विकारःसषंडकः इ
तिषंडकलक्षणं मौनंयोगासनंयोगस्तितीक्षैकांतशीलता निस्पृहत्वंसमत्वं
चसप्तैतान्येकदंडिनः इतिमौनादिसप्तकं २२ इडाचपिंगलाचैवसुषुम्णाचततः
परं गांधारीहस्तिजिह्वाचपूषाचैवपयस्विनी लकुहालंबुसाचैवशंखनीदश सं॰रा॰
नाडिकेतिनाडिकादशकं २३ इडाचंद्रनाडी १ पिंगलासूर्यनाडी २ सुषुम्णा १९

29

ग्रस्तसुषुप्तिस्स्वप्नः सुषुप्तिसुषुप्तिरिति सुषुप्तित्रयं १६ कुटीचकबहूदकहंसपर
महंसश्चेति संन्यासचतुष्टयं १७ ज्ञानात्मा महानात्मा शान्तात्मा चेति आत्मत्र
यं १८ सामान्याहंकारो विशेषाहंकारश्चेति अहंकारद्वयं ११ ब्रह्मानंदो विषया
नंदो वासनानंदश्चेति आनंदत्रयं १२ निजानंदमुख्यानंदात्मानंदयोगानंदाद्वै
तानंदानां ब्रह्मानंदेऽन्तर्भावः विद्यानंदस्य विषयानंदेऽन्तर्भावः तत्त्वविदोपि
क्लेशानुवृत्त्ययायास्त्वेवासंप्रज्ञातसमाध्यपेक्षा तस्य चासंप्रज्ञातसमाधेर्योगवाशि
ष्ठिविवादिनिरोधः प्रथमा भूमिः १ वासनाकादिविविधनिर्मननं द्वितीया २ तंद्वा
भिमानाहंकारराहित्यं तृतीया ३ सुषुप्ताविव महत्त्वराहित्यं चतुर्थी भूमिकेति भूमि
काचतुष्टयं १९ तदेतद्भूमिचतुष्टयमभिप्रेत्य शनैः शनैरुपरमेदित्युक्तं भगवता

वेदां० मानदनुकूलव्यापारवान् जीवो भवति शशिमदाविर्भावे चिंताभरितः करिष्य
२० माणकार्यं भविष्यति वा कृतं चेदस्य पापं भविष्यति वेति संशयवान् [illegible]स्थितो भव
ति लक्षणमात्रजीवः पवनमदाविर्भावे प्रयाणभरितः परदेशेच्छावान् भवति
आकाशमदाविर्भावे वाहनभरितः गजाश्वादीच्छावान् सूर्यमदाविर्भावे क्रो
धाग्निभरितः इदं संहर्तव्यमितीच्छावान् आत्ममदाविर्भावेऽहंकारभरितः
२० विद्यादिभिः मम समः को वेति प्रजावान् भवति जीवशक्तिविवेकः घृणाशंका
भयं लज्जा जुगुप्सा चेति पंचकं कुलं शीलं च वृत्तं च ह्यष्टौ पाशाः प्रकीर्तिताः २८ २
सो रुधिरमांसं च मेदो मज्जास्थिरेतसी सप्तधातुरयं प्रोक्तः सर्वदेहसमाश्रय इति संज्ञाः
सप्तधातवः २९ भुक्तमन्नरसात्मकं तया परिणतं सन्नरसः समुच्यते । एवं सर्व २०

मध्यनाडी ३ गांधारीदक्षिणनेत्रिका ४ हस्तिजिह्वावामनेत्रिका ५ पूषादक्षिण
कर्णिका ६ पयस्विनीवामकर्णिका ७ अलंबुषागुदनाडी ८ कुहूमेढ्रनाडी ९
शंखिनीनाभिनाडीतिविवेकः १० हरिब्रह्मरुद्रेंद्रवरुणेशपद्मोद्भवपृथिवीसूर्य
चंद्राः क्रमान्नाडीनांदशदेवताः २४ धनिनीस्थितिनीकांतिनीवर्तिनीमोहिनीसं
तिचारिणीवाहिनीसप्तांतरंगमदाः २५ कुलंशीलंधनंचैवरूपंयौवनमेवच वि
द्याराज्यंतपश्चैवइत्येतेष्टावुदीर्मदाः २६ पृथ्वीसलिलानलंपावकः शशिपवनौ अ
र्करविः आत्मेत्यष्टमूर्तिमदाः २७ पृथ्वीमदाविर्भावेजीवः तमोगुणभरितः वस्त्रा
दीच्छावान्भवति सलिलमदाविर्भावेसंसारभरितः ममेदमावश्यकमितिचिं
तायुक्तोभवतिजीवः पावकमदाविर्भावेकामरसभरितः वनितासंभोगेच्छ

वेदां॰ इत्याभिमानव्यवहारः वर्णाश्रमः ४ शोधं स्फुटं अविद्यास्मितारागद्वेषाभिनिवेशाः
२१ पंचक्लेशा ३२ अथवा अविद्यास्मितास्वपास्पर्धाभिनिवेशाः पंचक्लेशाः मलम
आदिवेष्टितस्थूलशरीरमेवाहमित्यभिमान एवाविद्या १ तापत्रयेनानुभवएवा
स्मिता २ रागादिभिः परिभवानुभवएवासूया ३ सज्जनदर्शने द्वेषबुध्यानिरो
22 धनमेवस्पर्धा ४ लोकरंजनायतदुचितकर्मोद्योगवेषादिधारणाभिनिवेशइ
तिविभावनीयं मानसतापः शारीरतापइत्याध्यात्मिकतापद्वयं ३३ ज्वरगु
ल्मशूलादिदोषसंपादिततापःशारीरः १ असूयामदमात्सर्यादिसंपादित
चित्तव्याकुलत्वेवमानसतापइतिभावनीयं त्वपतापः १ अतिशयतापः २ सा संज्ञाः
हसपतनतापइतिस्वर्गलोकतापत्रयं ३४ यथास्वार्जितधनत्वयेनमनोविचा २१

त्रुरुधिरादिषुरुधिरात्मकतयेत्यादिज्ञेयं तनुव्यसनमनोव्यसनधनव्यसनराज्य
व्यसनविश्वव्यसनोत्साहव्यसनसेवकव्यसनानीतिसप्तव्यसनानि १२० तनु
व्यसनोदयेशरीरंकष्टंजातमितिजीवः खिन्नोभवति १ मनोव्यसनोदयेचौ
र्यपरेछादिमानजीवोभवति २ विश्वव्यसनोदयेगरहत्तेत्रादिसंपादनेछावा
नभवतिजीवः ३ उत्साहव्यसनोदयेपुत्रकलत्रादीछावानजीवोभवति ४ से
वकव्यसनोदयेपरराष्ट्रगमनादिसकलधर्मपोषणारतोभवतिजीवः ५ शेषंस
ष्टार्थं कुलगोत्रजातिवर्णाश्रमेनामभेदेनषड्भ्रमाः ३१ मालवकर्णाटकद्राविड
भेदाभिमानव्यवहारःकुलभ्रमः १ विश्वामित्रादिव्यवहारोगोत्रभ्रमः २ ब्रह्म
क्षेत्रवैश्यशुद्रभेदाभिमानव्यवहारःजातिभ्रमः ३ अष्टादशवर्णेषुहंसेत्येष्ट

वेसं· तिपंचगुणाः प्रोक्तास्तथैवांशाः प्रकीर्तिता इति तथा च पृथिव्याः शब्दस्पर्शरूपरस
२२ गंधात्मकपंचगुणकत्वेन शब्दादिपंचगुणसंबंधिनः पृथिव्यां पंचविंशतिगुणाः
प्राप्ताः एकैकस्य शब्दगुणादेः प्रोक्तपंचविशेषगुणकत्वकथनात् तथा चा
पां विंशतिगुणाः २० अग्नेः पंचदश गुणाः १५ वायोर्दशगुणाः १० आकाश
22 स्य पंचगुणाः ५ इत्याहत्य पंचसप्तति गुणा इति सुधीभिर्विभावनीयं ७५ श्वेत
पीतरक्तहरितकृष्णमांजीष्ठभेदेन रूपं षड्विधं ३६ शीतोष्णमृदुकठिनभेदे
न स्पर्शश्चतुर्विधः ३७ अक्षरानक्षरभेदेन शब्दो द्विविधः ३८ मधुराम्लति
क्तकटुकषायलवणभेदेन रसः षड्विधः ३९ सुगंधदुर्गंधभेदेन गंधो द्विवि संज्ञा:
धः १४० प्राणः इंद्रनीलवर्णः १ अपानवायुः हरितवर्णः २ व्यानः कपिल २२

रात्मकत्ताप: तथापुण्यकर्मक्षयेपुनः पतनभीतिजन्यतापरावर्त्तायत्ताप १ स्व
र्गलोकगमनसमयेस्वाधिकतरदेवतास्थापितलोकदर्शनमेवातिशायत्ताप २
पुण्यकर्मक्षयानंतरंतत्रस्थसुरकोटिभिःसकरमुष्टालग्रहरणेनकेपितसर्वांग
पतनंस्वर्गलोकसाहसपतनतापइतिबोध्यं अथपंचसप्ततिगुणाः कथ्यंते
अस्थिमांसत्वचोनाडीरोमंचैवतुपंचकं पंचक्षितिगुणाः प्रोक्तास्तथैवांशाःप्रकी
र्तिताः श्लेष्ममूत्रंतथास्वेदंशुक्रंशोणितमेवच अपांपंचगुणाः प्रोक्तास्तथै
वांशाःप्रकीर्तिताः क्षुधातृष्णातथानिद्राह्यालस्यंसंगएवच अग्नेःपंचगुण
ःप्रोक्तास्तथैवांशाःप्रकीर्तिताः धावनंलंघनंचैवाकुंचनंप्रसारणं वियोगश्चे ३
तिविज्ञेयंवायोःपंचगुणाइति रागद्वेषोभयंलज्जामोहश्चनभसस्तथा ६

वेदां० प्रत्ययवादेनिरूप्यते अधिष्ठानमात्रपर्यवसानेशेषाणमपवादः तथाच सर्वप्र
२२ पंचरहितंब्रह्माहमस्मीतिप्रत्यगभिन्नब्रह्मज्ञानान्मुक्तिरितिसिद्धं इति
संज्ञाप्रकरणंसमाप्तं ॥ ॐ॥ ॥श्रीरस्तु॥ ॥ ॥ ॥

23 श्रुतिः अशरीरोऽप्राणो ह्यमनाः शुभ्रः सच्चिदानंदमात्रः मतसःसोजीवु
ॐ: साक्षीतमसः साक्षी सर्वस्य साक्षी

संज्ञाः
२२

वर्णः ३ उदानवायुः तडिद्वर्णः ४ समानः नीलवर्णः ५ नागवायुः पीतवर्णः
६ कूर्मः श्वेतवर्णः ७ कृकलः अंजनवर्णः ८ देवदत्तः स्फटिकवर्णः ९
धनंजयः इंद्रनीलवर्णः १ इत्याहुस्तनवर्णः १४१ ऐश्वर्यस्य समग्रस्य वीर्य
स्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा इत्यैश्वर्यादि
षट्कं १४२ उत्पत्तिं निधनं चैव भूतानामागतिं गतिं । वेत्ति विद्यामविद्यां
च स वाच्यो भगवानित्युक्तत्वाद् विषट्कं १४३ नादविंदुकलाः नादादित्रयं
१४४ संवृतेगलविवरे यत्कंठनिनादकरणं स नादः १ अनुस्वारो विंदुः
२ नादैकदेशाः कलेत्यर्थः ३ तथा चासंगाद्दितीयब्रह्मप्रतिपादके वेदां
तशास्त्रे बहुवचनमनुसृत्याध्यारोपवशात् संज्ञाः संतीति प्रतिपादितं सं

-२४